# शिव अपराध क्षमापन स्तोत्र

आदौ कर्मप्रसंगत् कलयति कलुषं मातृकुक्षौ स्थितं मां विण्मूत्रामेध्यमध्ये क्वथयति नितरां जाठरो जातवेदा: ।

यघद्वै तत्र दुखं व्यथयति नितरां शक्यते केन वक्तुं क्षन्तव्यो मेऽपराध: शिव शिव शिव भो श्रीमहादेव शम्भो ।।1।।

बाल्ये दुखातिरेको मललुलितवपु: स्तन्यपाने पिपासा नो शक्तश्चेन्द्रियेभ्यो भवगुणजनिता जन्तवो मां तुदन्ति ।

नानारोगादिदुखाद्रुदनपरवश: शंकरं न स्मरामि। क्षन्तव्यो. ।।2।।

प्रौढोऽहं यौवनस्थो विषयविषधरै: पंचभिर्मर्मसंधौ दष्टो नष्टो विवेक: सुतधनयुवतिस्वादसौख्ये निषण्ण: ।

शैवीचिंताविहीनं मम ह्रदयमहो मानगर्वाधिरुढ़ं । क्षन्तव्यो. ।।3।।

वार्द्धक्ये चेन्द्रियाणां विगतगतिमतिश्चाधिदैवादितापै: पापै रोगैर्वियोगैस्त्वनवसितवपु: प्रौढिहीनं च दीनम् ।

मिथ्यामोहाभिलाषैर्भ्रमति मम मनो धूर्जटेध्र्यानशून्यं । क्षन्तव्यो. ।।4।।

नो शक्यं स्मार्तकर्म प्रतिपदगहनप्रत्यवायाकुलाख्यं श्रौते वार्ता कथं मे द्विजकुलविहिते ब्रह्ममार्गे सुसारे ।

नास्था धर्मे विचार: श्रवणमननयो: किं निदिध्यासितव्यं । क्षन्तव्यो. ।।5।।

स्नात्वा प्रत्यूषकाले स्नपनविधिविधौ नाहृतं गांतोयं पूजार्थं वा कदाचिद्बहुतरगहनात्खण्डबिल्वीदलानि ।

नानीता पदमाला सरसि विकसिता गंधपुष्पे त्वदर्थं । क्षन्तव्यो. ।।6।।

दुग्धैर्मध्वाज्ययुक्तैर्दधिसितसहितै: स्नापितं नैव लिंग नो लिप्तं चंदनाधै: कनकविरचितै: पूजितं न प्रसूनै: ।

धूपै: कर्पूरदीपैर्विविधरसयुतैर्नैव भक्ष्योपहारै: । क्षन्तव्यो. ।।7।।

eAstroHelp

ध्यात्वा चित्ते शिवाख्यं प्रचुरतरधनं नैव दत्तं द्विजेभ्यो हव्यं ते लक्षसंख्यैर्हुतवहवदने नार्पितं बीजमंत्रैः ।

नो तप्तं गांगतीरे व्रतजपनियमै रूद्रजाप्यैर्न वेदैः । क्षन्तव्यो. ।।8।।

स्थित्वा स्थाने सरोजे प्रणवमयमरुत्कुण्डले सूक्ष्ममार्गे शान्ते स्वान्ते प्रलीने प्रकटितविभवे ज्योतिरुपे पराख्ये ।

लिंगजे ब्रह्मवाक्ये सकलतनुगतं शंकरं न स्मरामि । क्षन्तव्यो. ।।9।।

नग्नो निःसंशुद्धस्त्रिगुणविरहितो ध्वस्तमोहान्धकारो नासाग्रे न्यस्तदृष्टिर्विदितभवगुणो नैव दृष्टः कदाचित् ।

उन्मन्यावस्थया त्वां विगतकलिमलं शंकरं न स्मरामि । क्षन्तव्यो. ।।10।।

चन्द्रोद्भासितशेखरे स्मरहरे गंगाधरे शंकरे सर्पैर्भूषितकण्ठकर्णविवरे नेत्रोत्थवैश्वानरे ।

दन्तित्वक्कृतसुन्दराम्बरधरे त्रैलोक्यसारे हरे मोक्षार्थं कुरु चित्तवृत्तिमखिलामन्यैस्तु किं कर्मभिः ।।11।।

किं वानेन धनेन वाजिकरिभिः प्राप्तेन राज्येन किं किं वा पुत्रकलत्रमित्रपशुभिर्देहेन गेहेन किम् ।

ज्ञात्वैतत्क्षणभंगुरं सपदि रे त्याज्यं मनो दूरतः स्वात्मार्थं गुरुवाक्यतो भज भज श्रीपार्वतीवल्लभम् ।।12।।

आयुर्नश्यति पश्यतां प्रतिदिनं याति क्षयं यौवनं प्रत्यायान्ति गताः पुनर्न दिवसाः कालो जगद्भक्षकः ।

लक्ष्मीस्तोयतरंगभंगचपला विद्युच्चलं जीवितं तस्मान्मां शरणागतं शरणद त्वं रक्ष रक्षाधुना ।।13।।

करचरणकृतं वाक्कायजं कर्मजं वा श्रवणनयनजं वा मानसं वापराधम् ।

विहितमविहितं वा सर्वमेतत्क्षमस्व जय जय करुणाब्ध श्रीमहादेव शम्भो ।।14।।